# निबन्धाः

## भारतवर्षम्

अस्माकं देशः भारतवर्ष नाम अस्ति । अयं देशः अतीव विशालः । अस्य उत्तरस्यां दिशि पर्वतराजो हिमालयः । तस्मात् नाना नद्यः प्रभवन्ति । ताभिः भारतस्य उत्तरभूभागः सिच्यते । गङ्गा, यमुना, सरयू, गण्डकी, कोशी प्रभृतयः नद्यः तासु प्रधानाः । भारतस्य दक्षिणभागः पर्वतीयः वर्तते । तत्र नर्मदा गोदावरी, कावेरी, इत्यादयः प्रधानाः नद्यः पूर्वस्मिन् पश्चिमे वा समुद्रे मिलन्ति । पूर्वापर-सागरयोः तटप्रदेशाः मनोरमाः सन्ति । भारते तीर्थनगराणि यथा-काशी, मथुरा, प्रयागः, हरिद्वारम् इत्यादीनि नदीतटे सन्ति । एवमेव औद्योगिक-नगराणि कोलकाता, मुम्बई, चेन्नई, कानपुर, दुर्गापुर, जमशेदपुर-प्रभृतीनि देशस्य समृद्धिं वर्धयन्ति । अयं देशः ग्रामप्रधानः कृषिप्रधानः च वर्तते । अधुना शनैः शनैः उद्योगाः प्रधानाः भवन्ति । अस्मिन् देशे प्राचीनता नवीनता च सहैव वर्तेते इति अस्य विशिष्टता अस्ति ।

## हिमालयः

हिमालयो नाम पर्वतः नगाधिराजः । संसारस्य सर्वेषु पर्वतेषु श्रेष्ठः विपुलश्च हिमालयः अस्ति । उच्चतमः पर्वतोऽयम् । अस्माकं प्राचीनेषु ग्रन्थेष्वपि अस्य महिमा गीयते । भारतस्य उत्तरभागे स्थितोऽयं पर्वतराजः बहूनां नदीनाम् उद्गमस्थानं वर्तते । अस्य तुषारैः तृप्ताः ताः उत्तरं भारतं सिञ्चन्ति । हिमालये नाना तीर्थस्थलानि सन्ति यथा गंगोत्तरी, केदारनाथः, बदरीनाथः, वैष्णवीदेवी इत्यादीनि । तत्र प्रतिवर्षं ग्रीष्मे श्रद्धालवः गच्छन्ति । किंच हिमालये बहूनि नगराणि अवस्थितानि सन्ति यथा श्रीनगरम्, शिमला, मनाली, मसूरी, नैनीताल, दार्जिलिङ्ग, गंतोक इत्यादीनि । हिमालयः भारतं शत्रुभ्यः शीतेभ्यो वायुभ्यश्च रक्षति । अयं बहूनि भेषजयुक्तान् वनस्पतीन् अस्मभ्यं ददाति । अस्य सम्पूर्णः विशालः परिसरः प्रकृतिदेव्याः क्रीडाभूमिः वर्तते ।

## गङ्गानदी

भारतस्य देशस्य सर्वासु नदीषु गङ्गा श्रेष्ठा पवित्रता च मन्यते । इयं पर्वतराजात् हिमालय निर्गम्य उत्तरभारतस्य विविधान् प्रदेशान् उत्तीर्य वंगोपसागरे पतति । अस्यास्तीरे अनेकाः प्राचीन नगर्यः स्थिताः सन्ति यथा-हरिद्वारम्, कानपुरम्, प्रयागः, वाराणसी, पाटलिपुत्रम्, मुद्गलगि (मुंगेर), भागलपुरम् इत्यादयः । एतासु नगरीषु प्राचीना सभ्यता संस्कृतिश्च विकसिता अभवत् गङ्गा हिमालयस्य वनस्पतीनां गुणान् गृहीत्वा जलं धारयति । अतः गुङ्गाजलमिति पावनताय पर्यायः कथ्यते । सा देवनदी इत्यपि कथ्यते । गङ्गास्नानं, गङ्गाजलसेवनं, गङ्गोच्चारणं च देवपूजनव पवित्रं मन्यते । कथ्यते च-गङ्गास्मरणमात्रेण पापं नश्यति । किन्तु जनानां स्वदोषेण सम्प्रति तस्य जलं शनैः शनैः प्रदूषितं भवतीति दुःखस्य वार्ता ।

## अस्माकं विद्यालयः

अस्माकं विद्यालयः विशालः वर्तते । अस्य प्रसिद्धिः सम्पूर्णक्षेत्रे विद्यते । अत्र प्रधानाध्यापक अनुशासनप्रियः विद्यालयस्य विकासाय च निरन्तरं प्रयत्नं करोति । शिक्षकाः स्वस्वकर्मसु कुशल छात्रेषु लोकप्रियाः सन्ति । अतएव अस्य परीक्षाफलं सदैव उत्कृष्टं जायते । क्रीडाक्षेत्रेऽपि अस छात्राः यशः वर्धयन्ति । यदा कदा उत्सवाः समारोहाश्च विद्यालयेऽस्मिन् भवन्ति । तेषु नगरस प्रतिष्ठिताः जनाः निमन्त्रिताः भवन्ति । विद्यालये सर्वे कक्षाः स्वच्छाः सन्ति, बाह्यपरिसरश निर्मलः अस्ति । विद्यालये एकं प्रशस्तं क्रीडाक्षेत्रमस्ति, हरितदूर्वाच्छन्नं च । छात्राणां सर्ववि विकासः विद्यालयस्य लक्ष्यमस्ति । स एव विद्यालयः श्रेष्ठो भवति यत्र शिक्षकाः छात्राश्च प्रसन्न सन्ति । तादृशम् एवास्माकं विद्यागारम् ।

## वसन्तऋतुः

भारतवर्षे षड् ऋतवो भवन्ति । तेषु वसन्तः ऋतुराजः अस्ति । चैत्रवैशाखयोः मासय वसन्तः जायते । इदानीं न शीतस्याधिक्यं न च ग्रीष्मस्य प्रचण्डता भवति । समशीतोष्णत अयमृतुः सर्वेभ्यो रोचते । सर्वे प्राणिनः वनस्पतयश्च अस्मिन् ऋतौ प्रमुदिताः भवन्ति । वृक्ष

नवपल्लवाः, नवकुसुमानि च शोभन्ते । वासन्तिकानि सस्यानि क्षेत्रेभ्यः खले (ख़लिहान में) आनीयन्ते, अन्नातिन च लभ्यन्ते । अतएवः कृषकाः प्रसन्नाः भवन्ति । ऋतुपरिवर्तनेन वसन्ते केचन रोगाः अपि प्रभवन्ति । वसन्तस्य प्राकृतिकं सौन्दर्यं नगरेषु दुर्लभं भवति । नगरोद्यानेषु अथवा ग्रामेषु एवास्य शोभा दर्शनीया भवति ।

## मम परिवारः

मम परिवारः ग्रामे (नगरे) निवसति । परिवारे वरिष्ठः सदस्यः मम ज्येष्ठपितृव्यः वर्तते । ततः मम पिता वर्तते यः प्रशासनसेवायां कार्यं करोति । (मम पिता ग्रामे निवसन् कृषिकार्यं करोति) मातापि परिवारे गृहकार्याणि करोति । मम ज्येष्ठपितृव्यः सर्वान् परिवारसदस्यान् रक्षति । स्वयं च गृहाद् बहिः कक्षे निवसति । तस्य आज्ञां सर्वे पालयन्ति । मम परिवारे एका स्वसा वर्तते । मम अनुजः इदानीं प्राथमिक-कक्षायां पठति । स्वसापि तत्रैव पठति । गृहे एका सवत्सा धेनुः विद्यते । तस्याः सेवां सर्वे कुर्वन्ति । मम परिवारः अतीव सुखी वर्तते । सर्वे जनाः सन्तुष्टाः तिष्ठन्ति ।

## ग्रामजीवनम्

भारतवर्ष ग्रामप्रधानो देशः । यद्यपि अधुना नगराणि अतीव त्वरया विकासशीलानि सन्ति तथापि ग्रामाः अद्यापि प्रचुराः वर्तन्ते । ग्रामे जीवनं प्रायेण स्वाभाविकं वर्तते न तु कृत्रिम् । ग्रामे कूपाः सरोवराः नद्यः वा जलस्य साधनानि सन्ति । तत्र कृत्रिमाणि जलसाधनानि न सन्ति । तत्र कृषिः बहूनां जीवनस्य साधननमस्ति । कृषिकार्यं कठिनं भवति । अतएव ग्रामे सर्वे परिश्रमशीलाः जनाः सन्ति । अपि च ग्रामे शुद्धः वायुः, शुद्धं जलं च सुलभम् । अतः स्वास्थ्यं तत्र स्वभावतः वर्तते । यद्यपि आधुनिकानि वैज्ञानिकानि उपकरणानि ग्रामे सर्वत्र न सन्ति तथापि ग्रामीणः जनाः सन्तुष्टाः दृश्यन्ते । अधुना प्रशासनं सक्रियं वर्तते । ग्रामेऽपि नगरसुविधाः गच्छेयः तदा ग्रामात् पलायनं न भविष्यति ।

# पत्रलेखनम्

## आवेदनपत्रम्

**1. विद्यालय में प्रवेश पाने के लिए प्रधानाध्यापक को ।**

सेवायाम्

श्रीमन्तः प्रधानाचार्यमहाभागाः

..................विद्यालयः/महाविद्यालयः

(स्थाननाम) ।

महोदयाः,

सविनयं निवेदनं वर्तते यत् अहं .............. विद्यालयात् दशमकक्षाम् उत्तीर्णवानस्मि । म परीक्षाफलं सन्तोषावहं प्रकृष्टं वर्तते । मम पितुः स्थानान्तरणं सम्प्रति नगरेऽस्मिन् जातम् । अ भवतां विख्याते (महा) विद्यालये एकादशकक्षायां प्रवेशमिच्छामि । प्रार्थनास्ति यद् भवन्तो म स्वविद्यालये (महाविद्यालये) तस्यां कक्षायां नामाङ्कनस्य अनुमतिं दातुं कृपां करिष्यन्ति । तदर्थं सर्वदा भवतां कृतज्ञो भविष्यामि ।

दिनाङ्कः .............

कृपाभिलाषी

भवतां छात्रः

.......... (नाम) ......

**2. विद्यालय में समारोह का वर्णन करते हुए मित्र को पत्र ।**

(स्थाननाम)

दिनाङ्कः .................

प्रिय मित्र..................

सप्रेम नमस्ते ।

तव पत्रं मया अद्यैव प्राप्तम् । सर्वं कुशलं ज्ञातम् । अत्र विद्यालये एकः विशिष्टः समारोहः आयोजितः आसीत् । तस्मिन् विद्यालयस्य अनेके छात्राः शिक्षकैः सह व्यस्ताः आसन् । अहमपि सभायाः अलङ्करणस्य कार्ये नियुक्तः आसम् । समारोहे नगरस्य प्रमुखः अन्ये च विशिष्टाः जनाः आगताः । तेषां भाषणं बहु उत्साहप्रदम् अभवत् । अस्माकं विद्यालयस्य कार्यक्रमस्य ते महतीं प्रशंसां कृतवन्तः । योग्येभ्यः छात्रेभ्यः पुरस्कारा अपि प्रदत्ताः ।

पितृचरणयोः मातृचरणयोश्च मम प्रणामं निवेदय ।

तव सुहृद्

.....(नाम).....

**3. परीक्षा-फल के विषय में अपने पिता को पत्र ।**

(स्थाननाम)

दिनाङ्कः ..................

पूज्यवर्येषु पितृचरणेषु,

सादरं प्रणामाः ।

अहमत्र सर्वथा सकुशलः । तत्रापि सर्वे कुशलिनः सन्तीति वर्तते मम विश्वासः । विशेषतः इदमेव सूचयितुं पत्रमिदं लिखामि यत् नवमकक्षायाः परीक्षापरिणामः प्रकाशितः । तत्र स्वकक्षायां प्रथमं स्थानं मया लब्धम् । इदानीमधिकेन परिश्रमेणाहं पठामि । अस्मिन् वर्षे दशमकक्षायाः बोर्डपरीक्षा भविष्यति । अतएव तत्र उत्कृष्टं परिणामं प्राप्तुं परिश्रमः अपेक्षितः अस्ति ।

मातृचरणेषु मम प्रणामाः ।

भवतामात्मजः

........(नाम)......



# राष्ट्र-गान

जन-गण-मन-अधिनायक जय हे,
भारत - भाग्य - विधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ - उत्कल - बंग।
विंध्य - हिमाचल - यमुना-गंगा.
उच्छल - जलधि - तरंग।
तव शुभ नामे जागे,
तव शुभ आशिष मागे
गाहे तव जय गाथा।
जन-गण-मंगलदायक जय हे,
भारत - भाग्य - विधाता।
जय हे, जय हे, जय हे,
जय जय जय जय हे।

बिहार स्टेट टेक्स्टबुक पब्लिशिंग कॉरपोरेशन लि०, बुद्ध मार्ग, पटना-1
BIHAR STATE TEXTBOOK PUBLISHING COPORATION LTD., BUDH MARG, PATNA-1

मुद्रक : सुनैना प्रिंटिंग प्रेस, बैरिया, पटना-7